## निर्वृत्तेऽक्षद्यूतादिभ्यः। (१९/१५६९)

तेन इत्येव। अक्षद्यूतादिभ्यः तृतीयासमर्थेभ्यो निर्वृत्ते इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अक्षद्यूतेन निर्वृत्तम् आक्षद्यूतिकं वैरम्। जानुप्रहृतिकम्।

अक्षद्यूत। जानुप्रहृत। [1]जङ्घाप्रहृत। [2]पादस्वेदन। कण्टकमर्दन। [3]गतागत। [4]यातोपयात। अनुगत। अक्षद्यूतादिः॥

## त्रेर्मम् नित्यम्। (२०/१५७०)

निर्वृत्त इत्येव। 'ड्वितः क्त्रिः' (३.३.८८/३२६६) इत्ययं [5]त्रिशब्दो गृह्यते। [6]त्र्यन्तान् नित्यं मप् प्रत्ययो भवति तेन निर्वृत्ते इत्येतस्मिन्नर्थे। 'डुपचष् पाके' (धा.पा.९९७) – पक्त्रिमम्। 'डुवप्' (धा.पा. १००३) – उप्त्रिमम्। 'डुकृञ्' (धा.पा.१४७३)–कृत्रिमम्। नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थम्, तेन [7]त्र्यन्तं नित्यं मप्प्रत्ययान्तमेव भवति, विषयान्तरे न प्रयोक्तव्यम् (म.भा.२. ३३०) इति।

[४८६] भावप्रत्ययान्तादिमब्वक्तव्यः। (म. भा. २.३३०)

पाकेन निर्वृत्तम् पाकिमम्। [8]त्यागिमम्। [9]सेकिमम्। [10]कुट्टिमम्॥

## अपमित्ययाचिताभ्यां कक्कनौ। (२१/१५७१)

निर्वृत्त इत्येव। अपमित्ययाचितशब्दाभ्यां यथासङ्ख्यं कक् कन् इत्येतौ प्रत्ययौ भवतः निर्वृत्ते इत्येतस्मिन्नर्थे। आपमित्यकम्[11]। याचितकम्॥

## संसृष्टे। (२२/१५७२)

तेन इत्येव। तृतीयासमर्थात् संसृष्टे इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। संसृष्टम् एकीभूतम् [12]अभिन्नम् इत्यर्थः। दध्ना [13]संसृष्टं दाधिकम्। [14]मारिचिकम्। [15]शाङ्र्गवेरिकम्। [16]पैप्पलिकम्॥

## चूर्णादिनिः। (२३/१५७३)

चूर्णशब्दाद् [17]इनिः प्रत्ययो भवति संसृष्टे[18]। ठकोऽपवादः। चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः। [19]चूर्णिनो धानाः[20]॥

---

1. जङ्घाप्रहरतिकम् ब. 2. पादच्छन्दन ह. 3. गतानुगत ब. 4. पातोपयात ब. 5. क्त्रि ड. इ. 6. क्त्र्यन्तात् ड. इ, प्रातिपदिकात् इत्यधिकम् ह. 7. क्त्र्यन्तात् ड. इ. 8. रागिमम् क. ड. इ. 8. सेकिमम् नास्ति फ. ह. 10. कुट्टिमम् नास्ति फ. 11. ठकोऽपवादः इत्यधिकम् ह. 12. संभिन्नम् ब, संमिश्रम् ड. 13. एकीभूतम् ड. 14. मारीचिकम् ड. 15. शाङ्र्गवैरिकम् ब. 16. पैप्पिलिकम् ब. क. 17. तृतीया-समर्थात् इत्यधिकम् ह. 18. अर्थे इत्यधिकम् ब. क. इ. फ, इत्येतस्मिन्नर्थे ह. 19. चूर्णिन्यः फ. 20. चूर्णिनो माषाः इत्यधिकम् ह.